श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

माडभूषी वेङ्कटराघवाचार्यस्य कृतिषु

# ॥ श्रीमालोलपञ्चरत्नम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीमालोलपञ्चरत्नम् ॥

कदा पुण्ये ह्रद्ये खगपतिगिरौ भार्गवतटे
श्रिया चञ्चूदेव्या श्रममुषि चरन्तं नरहरिम्।
अये ! लक्ष्मीकान्तांबुजनयन ! कायाधवनुत !
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥ १ ॥

कदा वा संसुप्तं महति कमनीयाद्रिकुहरे
सदा श्रीभूमिभ्यां मृदितपदपद्मं नरहरिम्।
सुराधीशैस्सर्वैः विनुतपदपद्म ! त्रिनयन !
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥ २ ॥

कदा वा द्रक्ष्येऽहं श्रितजनसखं मङ्गलगुणं
श्रियःकान्तं श्रीवण्शठरिपुयतीशार्चितपदम्।
हरे ! विष्णो ! कृष्णाच्युत ! मुरहर ! क्रोडनृहरे !
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥ ३ ॥

कदा वा कान्तारे नृहरिपदपद्माङ्किततटे
स्मरन् लक्ष्मीकान्तं कमलनयनं चन्द्रधवलम्।
अये ! षष्ठश्रीवण्शठरिपुयतीन्द्रप्रिय ! हरे !
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्॥ ४ ॥

स्तम्भे दर्शय विष्णुमव्ययमिति प्रोक्तेन पित्रा क्षणात्
स्तम्भे प्रादुरभूत् कयाधुतनयेनाभ्यर्चितो यो हरिः।
तं लक्ष्मीनरसिंहरूपिणमहं ताक्ष्याद्रिताराधिपं
स्वाङ्कारूढहरिप्रियाभुजसमाश्लिष्टं मुरारिं भजे॥ ५ ॥

मालोलपञ्चरत्नं माधवमङ्गलगुणांबुधेर्नीतम्।
जीयादिदं ज्ञभुक्तं वेङ्कटराघवविपश्चिता नित्यम्॥ ६ ॥

॥ इति श्रीमालोलपञ्चरत्नं समाप्तम् ॥

www.prapatti.com